# .. shrIbhavAnIkavacham ..

# ॥ શ્રીભવાનીકવચમ્ ॥

## Document Information

Text title : bhavAnIkavacham
File name : bhavaaniikavach.itx
Category : kavacha
Location : doc_devii
Author : Traditional
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : WebD
Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
Description-comments : rUdrayAmala_ta.ntra
Latest update : October 31, 2005
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ શ્રીભવાનીકવચમ્ ॥

શ્રીગણેશાય નમઃ ।
શ્રી પાર્વત્યુવાચ ।
ભગવન્ સર્વમાખ્યાતં મન્ત્રં યન્ત્રં શુભ પ્રદમ્ ।
ભવાન્યાઃ કવચં બ્રૂહિ યદ્યહં વલ્લભા તવ ॥ ૧॥

ઈશ્વર ઉવાચ ।
ગુહ્યાદ્ગુહ્યતરં ગોપ્યં ભવાન્યાઃ સર્વકામદમ્ ।
કવચં મોહનં દેવિ ગુરુભક્ત્યા પ્રકાશિતમ્ ॥ ૨॥

રાજ્યં દેયં ચ સર્વસ્વં કવચં ન પ્રકાશયેત્ ।
ગુરુ ભક્તાય દાતવ્યમન્યથા સિદ્ધિદં નહિ ॥ ૩ ॥

ૐ અસ્ય શ્રીભવાની કવચસ્ય સદાશિવ ઋષિરનુષ્ટુપ છન્દઃ,
મમ સર્વકામના સિદ્ધયર્થે શ્રીભવાની ત્રૈલોક્યમોહનકવચ
પાઠે વિનિયોગઃ
પઞ્ચબીજાશિરઃ પાતુ લલાટે પઞ્ચમીપરા ।
નેત્રે કામ પ્રદા પાતુ મુખં ભુવન સુન્દરી ॥ ૪॥

નાસિકાં નારસિંહી ચ જિહ્વાં જ્વાલામુખી તથા ।
શ્રોત્રે ચ જગતાં ધાત્રી કરૌ સા વિન્ધ્યવાસિની ॥ ૫॥

સ્તનૌ ચ કામકામા ચ પાતુ દેવી સદાશુચિઃ ।
ઉદરં મોહદમની કણ્ડલી નાભમણ્ડલમ્ ॥ ૬॥

પાર્શ્વૈ પૃષ્ઠકટી ગુહ્યસ્થાનનિવાસિની ।
ઊરૂ મે હિઙ્ગુલા ચૈવ જાનુની કમઠા તથા ॥ ૭॥

પાદૌ વિધ્નવિનાશા ચ અઙ્ગુલીઃ પૃથિવી તથા ।
રક્ષ-રક્ષ મહામાયે પદ્મે પદ્માલયે શિવે ॥ ૮॥

વાઞ્છિતં પૂરયિત્વા તુ ભવાની પાતુ સર્વદા ।
ય ઇદં કવચં દેવ્યા જાનાતિ સચ મન્ત્રવિત્ ॥ ૯॥

રાજદ્વારે શ્મશાને ચ ભૂતપ્રેતોપચારિકે ।
બન્ધને ચ મહાદુઃખે પઠેચ્છત્રુસમાગમે ॥ ૧૦॥

સ્મરણાત્કવચસ્યાસ્ય નિર્ભયો જાયતે નરઃ ।
પ્રયોગમુપચારસ્ય ભવાન્યાઃ કર્તુમિચ્છતિ ॥ ૧૧॥

કવચં પ્રપઠેદાદૌ તતઃ સિદ્ધિમવાપ્નુયાત્ ।

ભૂર્જપત્રે લિખિત્વા તુ કવચં યસ્તુધારયેત્ ॥ ૧૨॥

દેહે ચ યત્ર કુત્રાપિ સર્વ સિદ્ધિર્ભવેન્નરઃ ।
શસ્ત્રાસ્ત્રસ્ય ભયં નૈવ ભૂતાદિ ભયનાશનમ્ ॥ ૧૩ ॥

ગુરુ ભક્તિં સમાસાદ્ય ભવાન્યાસ્તવનં કુરુ ।
સહસ્ર નામ પઠને કવચં પ્રથમં ગુરુ ॥ ૧૪॥

નન્દિને કથિતં દેવિ તવાગ્રે ચ પ્રકાશિતમ્ ।
સાગન્તા જાયતે દેવિ નાન્યથા ગિરિનન્દિનિ ॥ ૧૫॥

ઇદં કવચમજ્ઞાત્વા ભવાનીં સ્તૌતિયો નરઃ ।
કલ્પ કોટિ શતેનાપિ નભવેત્સિદ્ધિદાયિની ॥ ૧૬॥

॥ ઇતિ શ્રીભવાની ત્રૈલોક્યમોહનકવચં સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar at hotmail.com

.. shrIbhavAnIkavacham ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*